श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्ताशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्ताशीतितमः सर्गः ॥

## इन्द्रजिद्विभीषणयोः सरोषः संवादः

एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः।
धनुष्पाणिं तमादाय त्वरमाणो जगाम सः॥ **6.87.1** ॥

अविदूरं ततो गत्वा प्रविश्य तु महद् वनम्।
अदर्शयत तत्कर्म लक्ष्मणाय विभीषणः॥ **6.87.2** ॥

नीलजीमूतसङ्काशं न्यग्रोधं भीमदर्शनम्।
तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत्॥ **6.87.3** ॥

इहोपहारं भूतानां बलवान् रावणात्मजः।
उपहृत्य ततः पश्चात् सङ्ग्राममभिवर्तते॥ **6.87.4** ॥

अदृश्यः सर्वभूतानां ततो भवति राक्षसः।
निहन्ति समरे शत्रून् बध्नाति च शरोत्तमैः॥ **6.87.5** ॥

तमप्रविष्टं न्यग्रोधं बलिनं रावणात्मजम्।
विध्वंसय शरैर्दीप्तैः सरथं साश्वसारथिम्॥ **6.87.6** ॥

तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रनन्दनः।
बभूवावस्थितस्तत्र चित्रं विस्फारयन् धनुः॥ **6.87.7** ॥

स रथेनाग्निवर्णेन बलवान् रावणात्मजः।
इन्द्रजित् कवची खड्गी सध्वजः प्रत्यदृश्यत॥ **6.87.8** ॥

तमुवाच महातेजाः पौलस्त्यमपराजितम्।
समाह्वये त्वां समरे सम्यग् युद्धं प्रयच्छ मे॥ **6.87.9** ॥

एवमुक्तो महातेजा मनस्वी रावणात्मजः।
अब्रवीत् परुषं वाक्यं तत्र दृष्ट्वा विभीषणम्॥ **6.87.10** ॥

इह त्वं जातसंवृद्धः साक्षाद् भ्राता पितुर्मम।
कथं द्रुह्यसि पुत्रस्य पितृव्यो मम राक्षस॥ **6.87.11** ॥

न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते।
प्रमाणं न च सौदर्यं न धर्मो धर्मदूषण॥ **6.87.12** ॥

शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः।
यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः॥ **6.87.13** ॥

नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरम्।
क्व च स्वजनसंवासः क्व च नीच पराश्रयः॥ **6.87.14** ॥

गुणवान् वा परजनः स्वजनो निर्गुणोऽपि वा।
निर्गुणः स्वजनः श्रेयान् यः परः पर एव सः॥ **6.87.15** ॥

यः स्वपक्षं परित्यज्य परपक्षं निषेवते।
स स्वपक्षे क्षयं याते पश्चात् तैरेव हन्यते॥ **6.87.16** ॥

निरनुक्रोशता चेयं यादृशी ते निशाचर।
स्वजनेन त्वया शक्यं पौरुषं रावणानुज॥ **6.87.17** ॥

इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः।
अजानन्निव मच्छीलं किं राक्षस विकत्थसे॥ **6.87.18** ॥

राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात्।
कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणाम्।
गुणो यः प्रथमो नृणां तन्मे शीलमराक्षसम्॥ **6.87.19** ॥

न रमे दारुणेनाहं न चाधर्मेण वै रमे।
भ्रात्रा विषमशीलोऽपि कथं भ्राता निरस्यते॥ **6.87.20** ॥

धर्मात् प्रच्युतशीलं हि पुरुषं पापनिश्चयम्।
त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा॥ **6.87.21** ॥

परस्वहरणे युक्तं परदाराभिमर्शकम्।
त्याज्यमाहुर्दुरात्मानं वेश्म प्रज्वलितं यथा॥ **6.87.22** ॥

परस्वानां च हरणं परदाराभिमर्शनम्।
सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः॥ **6.87.23** ॥

महर्षीणां वधो घोरः सर्वदेवैश्च विग्रहः।
अभिमानश्च रोषश्च वैरित्वं प्रतिकूलता॥ **6.87.24** ॥

एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः।
गुणान् प्रच्छादयामासुः पर्वतानिव तोयदाः॥ **6.87.25** ॥

दोषैरेतैः परित्यक्तो मया भ्राता पिता तव।
नेयमस्ति पुरी लङ्का न च त्वं न च ते पिता॥ **6.87.26** ॥

अतिमानश्च बालश्च दुर्विनीतश्च राक्षस।
बद्धस्त्वं कालपाशेन ब्रूहि मां यद् यदिच्छसि॥ **6.87.27** ॥

अद्येह व्यसनं प्राप्तं यन्मां परुषमुक्तवान्।
प्रवेष्टुं न त्वया शक्यं न्यग्रोधं राक्षसाधम॥ **6.87.28** ॥

धर्षयित्वा च काकुत्स्थं न शक्यं जीवितुं त्वया।
युध्यस्व नरदेवेन लक्ष्मणेन रणे सह।
हतस्त्वं देवताकार्यं करिष्यसि यमक्षयम्॥ **6.87.29**॥

निदर्शय स्वात्मबलं समुद्यतं
    कुरुष्व सर्वायुधसायकव्ययम्।
न लक्ष्मणस्यैत्य हि बाणगोचरं
    त्वमद्य जीवन् सबलो गमिष्यसि॥ **6.87.30**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ताशीतितमः सर्गः॥